Shri Raghunath Temple MSS. Library,
JAMMU

No. १५११

Title आख्यात विवेकः

Author श्री कृष्ण भट्टः

Extent ६ Age ४

Subject न्यायशास्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्याद्वानताद

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

आ॰ वा॰ ओं श्रीगणेशाय नमः आख्यातस्याश्रयोऽर्थः संख्या वर्तमानादिरूपकालस्तत्र समानपदोपात्त रु
पप्रत्यासत्त्या संख्याश्रयेऽन्वयः वर्तमानत्वादिकं तु धात्वर्थे व्यापारे ननु फलेऽसत एव फलसत्वे व्या
पारविगमे पचतीति न प्रयोगः अपितु अपाक्षीदित्येव तत्रापि फलाश्रयव्यापाराश्रयबोधे एकशब्दादि
१ समभिव्याहारः कारणं ननु पच्यते ओदनः स्वयमेवेत्यादौ एकत्र समभिव्याहारसत्वेऽपि कर्मबोधाभावे
न व्यभिचारः इति चेन्न सकर्मकधातोः समभिव्याहृत भावसाधारणविधिविधेयत्वेन कारणत्वो।
कारात् प्रकृते कर्मवत्कर्मणेति सूत्रेण भावकर्मणोरित्यस्यातिदेशेन भावसाधारणविधिविधेय
त्वेऽपि सकर्मकधातु समभिव्यवहाराभावात् एवं च देवदत्तः पचति ओदनं देवदत्तेनौदनः पच्यते इत्या
दौ एकदेवदत्ताभिन्नाश्रयिका ओदननिष्ठविक्लित्त्यनुकूला क्रिया इत्युभयत्राप्येकरूपेण बोधः एवं च
टं जानातीत्यत्र घटनिष्ठावरणभंगानुकूलो व्यापारः ईश्वरेऽपि घटनिष्ठावरणभंगानुकूलव्यापार
सत्वादीश्वरो घटं जानातीत्यादौ न काप्यनुपपत्तिः ननु प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्य
मिति न्यायेन विक्लित्त्यनुकूलव्यापाराश्रयाभिन्नश्चैत्र इति कर्तृविशेष्यक एव बोधः कुतो न स्वीक्रिय
ते न च भावप्रधानमाख्यातमित्यादिनिरुक्तविरोधः सर्वमाख्यातजं भामेत्यादौ आख्यातपदस्य धातोर
पि सत्वेन फलनिष्ठप्रकारतानिरूपितव्यापार विशेष्यतायास्तत्र सत्वेनाविरोधात् यथा च क्रे इत्यत्रामे
न स्यात् तिङ्. त्वेपि क्रियायाः प्राधान्यदर्शनेनेनं नामत्वेपि सत्व प्राधान्यादर्शनेन च व्यभिचाराच्चेति चेन्न प

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

चतिभवतित्यादीनांपचिक्रियाभनतिइत्यायर्थेप्रवृत्तेः भाष्यकारादिभिस्तत्स्वीकारेणपिशेष्यकवो
धस्यावश्यत्वात् नन्वेवंतिङ्गतिङ्इतिसूत्रस्यातिङ्पर्युदासेनपरभाष्यविरोधः पचतिभवतीत्या
दिनामप्येकवाक्यत्वेनतत्रनिघाताभावर्तनेनातिङ्ग्रहणस्यसार्थक्यादितिचेन्न तत्राप्यर्थैकत्वादे
कंवाक्यंसाकांक्षंचेद्विभागःस्यादित्येकवाक्यतासत्वेपिनिघातादिप्रयोजकेकतिङ्वाक्यमितिपा
रिभाषिकैकवाक्यत्वास्वीकारात् नन्वेवमपि सार्वधातुकेपजितिसूत्रस्यक्रियाक्रियांतरसमवायं
नगच्छतीतिभाष्यविरोधइतिकर्तृकर्मेतररूपेणसंवंधेननगच्छतीति तदर्थात् यन्तु ज्योतिष्टोमेन
यजेतस्वर्गकामइत्यादौकरणरूपेणाप्यन्वयदर्शनात् करणेतररूपेणापिवाच्यमित्याहुर्वैय्या
करणास्तन्नः तन्मंदं तत्रहिफलस्य क्रियायामन्वयोनतुक्रियायाः नचकलंजनभक्षेत्स्वर्गपापादित्यादौ
नमनक्रियायाः करणरूपेणान्वयइतिवाच्यं तत्रहेतुत्वेनवोधात् ननुतथापिपक्रियायाअसत्वे
भूतत्वेनक्रियांतरपकांक्षायाअभावेनकथमेकवाक्यतेतिचेन्न अमंतपकांक्षयापिएकवाक्यत्व
दर्शनात् अत्रेदमवधेयम् पुष्पवन्तपदवाच्याभिन्नाश्रयत्वविवक्षायांस्त्वइतिनियतद्विवचनमिव ः
अदृष्टसैंधवपदवाच्याभिन्नाश्रयत्वविवक्षानामपिद्विवचममेवस्यादितिचेन्न पुष्पवंतशब्दस्येवा
दृष्टसैंधवशब्दयोर्नियतद्विवचनान्तत्वाभावेनादृष्टमसिलिःसैवप्रयोगः यद्यप्यदृष्टशब्दस्यपुण्यपा
परूपाद्यर्थवोधकत्वं तथापिकार्य्यमात्रंप्रत्यदृष्टत्वेनकारणतयाकारणतावच्छेदकधर्मतयादृष्टा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग्रा॰ वे॰
२

त्वजातिसिद्धिः अत्र नैयायिकाः वदन्ति आख्यातस्य यत्नो वाच्यः यत्नार्थकरोतिना विवरणात् कृतस्थले तत्कृ
त्याश्रयः कर्त्ता तत्र जानातीत्यादौ तदा लक्षणेत्याहुः तन्न कर्तरि शक्तिग्राहकानुशासनविरोधात् नचस
तिबाधके व्याकरणस्य शक्तिग्राहकत्वं प्रकृते तु न तत्र कृतिशक्यतावच्छेदकत्वे गौरवात् लाघवानुसारेण।
कर्तृपदस्य कृतौ लक्षणया कृतिरेव सूत्रकर्त्रा विवक्षितेति चेन्न स्वायत्ते शब्दप्रयोगे किमित्यवाचकप्रयुञ्ज
हे इति न्यायेन मात्रालाघवेन च कृतिपदप्रवेशसिद्धौ कर्तृपदोच्चारणवैयर्थ्यापत्तेः नच कृतिकर्तरि श
क्तिबोधनार्थं तदावश्यकमिति वाच्यं कृतिपदस्य लक्षणया तद्बोधोपपत्तेः किंच आख्यातस्य कर्त्तर्यर्थे
-कृतेर्न शक्यतावच्छेदकत्वकल्पने गौरवमिति वाकाशादिशब्दस्य शब्दादिविशिष्टे शक्तिकल्पनेः तत्र
शब्दादौ शक्यतावच्छेदकत्वकल्पने गौरवं तस्मात्तत्रापि जातेः शक्यतावच्छेदकत्वे लाघवमिति तत्रापि
शब्दादावेव शक्तिकल्पनं स्यात् नचाकाशशब्दस्य शब्दादौ स्वारसिकप्रयोगो नास्तीति वाच्यं कृतावपि स्वा
रसिकप्रयोगाविरहस्य तुल्यत्वेत्यादिनाख्यातशिरोमणावुभयोस्तुल्यत्वाभिधानात् किंचाख्यातस्य यत्न
वाचकत्वे पाठकर्त्तस्य पठतीति विवरणमप्यसंगतं स्यात् विवरणं विव्रियमाणबोध्यमानार्थकत्वा
किंचाख्यातस्य कृतिवाचकत्वे पचतीत्यत्र पाककृतिरित्यर्थे संख्याबोधाभावात् देवदत्तः पचतीत्यादौ त
त्रैव संख्यावधानादाख्यातस्य संख्यावाचकत्वं व्यर्थं स्यात् आश्रयवाचकत्वे तु एकाश्रयिकाविशिनष्टीत्यनु
कूलक्रियेत्याश्रये एकत्वबोधार्थं तदावश्यकत्वात् नचैवं चैत्रो मैत्रश्च गच्छतः इत्यादौ स्यपाद्वित्वानभि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

थानेमिनन्तत्र द्वित्वबोधार्थं तदावश्यकमिति वाच्यं उक्तरीत्या द्वित्वादिवाचकत्वे सिद्धेपि एकत्वेशु
त्रभाभावात् वस्तुतस्तु नारदइत्यबोधिसइत्यत्रेति लाकर्मत्वादिबोधवच्चकारेणाव्यासज्यवृत्तिद्वित्व
बोधसंभवेनाख्यातस्य संख्यावाचकत्वानावश्यकत्वात् किंवाख्यातस्य कृतिवाचकत्वेप्याख्यातार्थकृ
तिसंख्याप्रकारकबोधं प्रति विशेष्यतासंबंधेन तत्पविशेषणकप्रथमान्तपदजन्योपस्थितेर्हेतुत्व
मितिपदद्वयवृत्तिकार्यकारणभावः तथाचमैत्रेणापच्यतेतण्डुलइत्यादौ मैत्रनिष्ठपाकभाव
विषयत्वान्तण्डुलः मैत्रनिष्ठभावनाविषयपाकजन्यफलशालीवातण्डुलइतिबोधः तत्राद्येमाख्या
ताकृतेराश्रयत्वापामैत्रविषयत्वापाचतण्डुलेसात्पादत्वयः द्वितीयेतुपरंपदस्येतिरथेनगम्यतेथोग्रा
मइत्यादौरथ्यनिष्ठगमनानुकूलव्यापारजन्यफलशालोग्रामइतिबोधः आश्रयेशक्तिस्वीकारेतु
आख्यातार्थसंख्याप्रकारकबोधं प्रति विशेष्यतासंबंधेनाख्यातार्थाश्रयोपस्थितिर्हेतुरित्येकपद
वृत्तिः कार्यकारणभावः इतराविशेषणकइतिमहल्लाघवम् किंच कृतिवाचकत्वेप
चतीत्यादौ वर्तमानत्वादेः कृतावन्वयः जानातीत्यादौ धात्वर्थव्यापारे इति गौरवम् आश्रयेशक्ति
स्वीकारेतु सर्वत्र धात्वर्थव्यापारएवेति लाघवम् नचतन्मते भिन्नपदोपात्तव्यापारे वर्तमान
त्वान्वयः मन्मतेतु समानपदोपात्तकृताविति लाघवमिति वाच्यम् कृतौ वर्तमानत्वान्वयेप
लस्य वर्तमानत्वेभाविव्यापारदशायां पचतीत्यापत्तेः जानातीत्यादौ तथाभवद्भिरपि स्वीकृत

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

आ॰ ख्या॰
३
3

त्वा किंचाख्यातस्य कृतिवाचकत्वे कृतित्वं शक्यतावच्छेआश्रयत्वं लक्ष्यतावच्छेदकम् कृतस्य लेकृ
तिशक्यतावच्छेदकेति गौरवम् आश्रयत्वा कत्वेन सर्वत्राश्रयत्वमेव शक्यतावच्छेदकमिति ला
घवम् किंच लाघवात् व्यापाराश्रयस्यैव कर्तृत्वं न तु कृतिमतः गतेत्यादौ धात्वर्थव्यापारस्य स्पन्दस्य च प्र
त्ययोनैकदेशाकृतौ अननुकूलतासंबंधेनान्वये पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्प
त्तिभंगापत्तेः ननु मैत्रादन्य इत्यादौ पंचम्यर्थप्रतियोगिकत्वस्यान्यपदार्थैकदेशे भेदेऽन्वय इव प्रकृ
तेपि भविष्यतीति चेन्न तत्रागत्या तत्स्वीकारेपि प्रकृते गतिसंभवेन तत्स्वीकारे गौर्नित्यापस्युरपस्यु
रित्यादीनामपि साधुत्वापत्त्या व्युत्पत्तेरुच्छेदापत्तेः ननु मैत्रादन्य इत्यादौ पंचम्यर्थप्रतियोगिक।
त्वस्य नान्यपदार्थैकदेशे भेदेऽन्वयः अपितु स्वाश्रयभेदवत्त्वसंबंधेन भेदविशिष्टे मैत्रप्रतियोगि
कत्वस्यान्वयः एवं गतेत्यादावपि स्यानुकूलकृतिमत्वादिपरंपरासंबंधेन धात्वर्थे गमनादेः क
र्त्रादिरूपकृत्यन्यपदार्थेऽन्वयः न तु पदार्थैकदेश इति चेन्न गौर्नित्यापस्युरपस्युरित्यादीनामप्य
वैरोत्यासाधुत्वापत्तेः साक्षादन्वयेना—पपत्तौ परंपरासंबंधे गौरवाच्च एवं चानन्तकृतिशक्यता
वच्छेदके गौरवमतिरिक्तं वचः किंच कृतेरपि व्यापारविशेषमन्तरायानुलभ्यत्वात्तत्राख्यातस्य शक्ति
कल्पनमनावश्यकम् अनन्यलभ्यो हि शब्दार्थ इति न्यायात् न च पाकं करोतीति विवरणात् कृतिर्न
धात्वर्थ इति वाच्यम् तत्र भक्तपाकस्याहेन फलबोधनात् न च काष्ठैः पाक इतिवत्स्यादिति वाच्यम्। ३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

करोतिसमभिव्याहृतपाकपदस्यैवफलमात्रवाचकत्वाद्धात्वर्थद्वयमुभाभ्यांबोधनात् इति
दिक्. ननुनवपंलाघवात्कृतिवाचकत्वमाख्यातस्य[—]मःपूर्वोक्तरित्यागौरवात् किंतुयत्नार्थक
करोतिनाविवरणादितिचेन्नकरोतिर्यत्नार्थकत्वस्यैववक्तुमशक्यत्वात् तथाहियदिकरोतिर्य
त्नकस्तदाटृधातोरिवकर्तृस्थभावकत्वेनकर्मवद्भावोनस्यात् किंचाख्यातस्यकृतिवाचक
त्वेसाम नाधिकरण्यानभिहितत्वव्यवस्थेनस्यातां तथाचचैत्रःपचतीत्यत्रचैत्रेणपच्यते ओदन
इत्यादौतृतीयाद्वितीयेस्यातांनचतत्रिष्टसंख्याभिधानत्वमितिवाच्यम् कृतौसंख्यान्वियाने
नचैत्रःपक्वेत्यादौतृतीयापत्तेस्तत्रकृत्यभिधानादनभिदानंकृत्यप्रत्ययेपिविशेषणतपाकृतेर
नभिधानमस्त्येवेतिवाच्यम् चैत्रेणक्रियतेघटइत्यादौधातुनाकृतेरभिधानात्तृतीयानापत्तेः नचति
ङः कृतद्धितैरेवाभिधानमितिवाच्यम् विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतमित्यत्रनिपातेनोक्तेपितैरनुक्तत्वात्तृ
तीयापत्तेःकर्म्मप्रत्ययेभिधानेनदेवदत्तःपच्यते ओदनइत्यापत्तेश्चपदिकर्मप्रत्ययेफलमेव
धात्वर्थःकृतिस्तुतृतीयार्थइतिविभाव्यतेतर्हिपूर्वोक्तएवदोषः किंचाख्यातस्यकृतिवाचकत्वेकृ
त्यपिकर्तृ[—]वाचकत्वंनस्यादुक्तेर्लौल्यात् नचसामानाधिकरण्यात्तत्रकर्तृवाचकत्वंआख्यात
तथात्वेतस्यसामानाधिकरण्यस्यतत्रवक्तुमशक्यत्वात् नचविशेष्यतासंबंधेनाभेदसंबंधकत
त्वामार्थप्रकारकशाब्दबोधंप्रतितत्वामोत्तरस्वार्थकविभक्त्युपस्थित्यकालिकतत्वामसमभिव्या

आ॰ वे॰ हतपदजन्योपस्थितिः कारणमिति कार्य्यकारणभावान्न कर्तृवाचकत्वमावश्यकमिति वाच्यम् त
स्यावलम्बस्याव्यापकत्वात् अत एव द्वित्वप्रत्ययविचारे प्रयोगस्याव्यवस्थापकत्वमुक्तम् आख्यातेपि तथा
४ वक्तुं शक्यत्वाच्च पक्वाजातः पाठको जात इत्यत्र कृतिबोधेनाभिधायाश्च न च नत्र लक्षणया कृतिबोधः
लाघवात् कर्तर्य्येव लक्षणया कृतौ शक्तिरित्यस्यापि वक्तुमशक्यत्वात् ननु क्तप्रत्ययाख्यातस्य कर्तृवाच
कत्वे पक्वोन्नः पंच नौका भवन्तीत्यादौ गृह्णातिवाच्यकः संख्याप्रकृते विकृतेर्नहीत्यादि नियमादु
क्तगतयकत्वाभिधाने नैकवचनमेव प्राप्नोतीति चेन्न मन्त्रगतो त्यादि वचनस्य व्यंत विषयकत्वात् अ
त एव संधीभवति ब्राह्मणा इत्यादौ बहुवचनं चान्ते तु सर्वत्र मन्त्रवत्त्वं त्वमेवाम्यहमित्यादौ प्रकृत्य
र्थयुष्मदस्मदर्थसामानाधिकरण्यान्मय्यमोतमदर्शनेन संख्यापाश्रपि प्रकृतावत्र पसौचित्यात्।
एतेन गृह्णातीति वचनं दृष्ट्वा पक्वोन्नः पंच नौका भवति इत्येकवचनं भवतीति वदन्तः परास्ताः
अत्राख्याते आख्यातवाचककारकसमानवचनत्वनियमः तेन अदृष्टस्य पापादि यर्थकबोधकत्वे
प्यदृष्टमस्तीत्येकवचनमेव दारशब्दस्य बहुर्थत्वाभावेपि बहुवचनमेव युष्मद्वन्तोस्तुः इति हि व
चनमेव सैंधवपदे यथा विवक्षितम् एकवचने भवतः एवं वेदाः प्रमाणं समुदिता हेतुरित्यादावुदे
श्यविधेययोः भिन्नविभक्तित्वे धातुक्रियावाचकपदमेकवचनान्तमेव प्रयोक्तव्यं विधेययोः प्रमा
हेत्वोरेकवचनान्तत्वानुरोधात् यदि तु शास्त्राणि चेत् प्रमाणं स्युरित्यादिप्रयोगदर्शनान्संतीति नवु ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वचनांतमेवप्रयुज्यतेइति निश्चयस्तदाव्याख्यानेनोद्देश्यगतापिसंख्योच्यते न क्वचिदित्याग्रहणीयम् न
नु विशेषणविशेष्यवाचकपदयोः समानवचनकत्वनियमात् वेदाः प्रमाणमित्यादीनामसाधुत्वमेवे
ति चेन्न उ सति प्रयोजने समानवचनकत्वनियमः प्रकृते तु सर्ववेदेषु एकरूपप्रामाण्यबोधकत्वे
न व्यासज्यवृत्तिहेतुत्वबोधकत्वेन च सार्थक्यात् अत एव प्रत्यक्षानुमानोपमानशब्दाः प्रमाणा
नीत्येकप्रयोगः तत्र भिन्नरूपप्रामाण्यस्यैव विवक्षितत्वात् वेदाः प्रमाणानि प्रत्यक्षानुमानोपमान
शब्दाः प्रमाणमित्यादीनामसाधुत्वम् किंच नैयायिकमतेन पचतीत्यादौ पाकानुकूलकृत्यभाव इ
बोधः तथा च भावनान्वयितिसंख्यान्वयनियमादभाव एव संख्यान्वयः स्यात् न चेष्टापत्तिः अभा
वस्यैकत्वेन न पचत इति द्वित्वसंख्यानन्वितो च स्यात् न च साधुत्वार्थमेव तत्र वचनम् संभवत्यर्थसा
धत्वे शब्दसाधुत्वस्याव्याप्यत्वात् ननु तद्वाक्यसाध्वेवेति चेन्न सूत्ररीत्यासाधुत्वे संभवति हि ऐच्छयाः।
साधुत्वात् तुल्यन्यायत्वात् वैयाकरणमते तु न पचतीत्यस्यैकाश्रयिका पचिक्रियाः भाव इति बो
धः अत्यंताभावबोधकनञर्थक्रियाया एव प्रतियोगितासंबंधेनान्वयस्य व्युत्पन्नत्वात् नन्वेवमभाव
स्य विशेष्यत्वे क्रियाप्रधानमाख्यातमिति वचनविरोधः इति आख्यातार्थप्रतिक्रियायाः प्राधान्यमिति
तदर्थात् किंच न वस्तुतः घटो नास्तीत्यादौ घटप्रतीको भावोऽस्तीति बोधः तत्र चाभावप्रतियोगिनि सं
ख्यान्वयः लोकार्थः अभावप्रतियोगि घटोऽस्तीति बोधः तु केऽप्यधिकरणकांतामन्यते नञर्थस्य विशे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ष्यत्वेनकोपिदोषः एतद्दोषस्यापितस्यप्रतियोगिनोऽनुयोगिन्याधाराधेयसंवंधेनान्वयवोधस्तत्र
त्संसर्गाभावस्यापितथात्वात् क्रियाश्रयस्यैवाभावाश्रयत्वान्नकेप्यधिकरणाकांक्षेतिलाघवम् ननु श
शशशृंगंनास्तीत्यादावुभयमते कथंवोधः शृंगेशशसंवंधस्याप्रसिद्धत्वादितिचेन्न अन्यत्रासत्यपि
सत्यर्थेज्ञानंशाब्दःकरोतीत्यभियुक्तोक्त्यावाधितोपिसंसर्गोभासते एवेतिस्वीकारात् अन्यथार्थप्रतीति
जनकरूपार्थवत्त्वाभावात्प्रातिपदिकत्वन्नस्यात् नचसमासग्रहणात्सिद्धिः तस्यनियमार्थत्वात्।
अन्यथामूलकेनोपदंशमित्यादिवाक्यस्यापिसंज्ञापत्त्यावहुपत्यलवःस्यात् नचशाब्दवोधेऽयोग्यता
निश्चयस्यप्रतिवन्धकत्वात् कथमेतदितिवाच्यं वैयाकरणैरयोग्यतानिश्चयस्ययोग्यताज्ञानस्यवा
प्रतिवंधकत्वकारणत्वास्वीकारात् अतएवयस्यत्नोरगाणपतेःपरार्द्ध्यपरपालस्योक्तनासंख्येत्यादौ।
एकवंध्यासुतोयातिखपुष्पकृतशेखरइत्यादौचायोग्यतानिश्चयेसत्यपियोग्यताभावाऽभावेपिच
शाब्दवोधः नचकेवलपदार्थोपस्थितिमात्रंनशाब्दवोधइतिवाच्यम् चमत्कारानापत्तेःप्रातिपदिक
त्वानापत्तेश्च नचैवंवह्निनासिंचेदित्यतोवोधःस्यादितिवाच्यम् इष्टापत्तेः नचप्रवृत्तिरपिस्यात्तत्रायो
ग्यतानिश्चयस्यप्रतिवंधकत्वात् अतएवशंभुर्विश्वमवत्यद्यस्वीकृत्यसमदृष्टितामित्यादौतथार
ड्पुत्रः इत्यादौचायोग्यतानिश्चयेसत्यपिवोधः एतेनशशशृंगजन्यमिदंकार्मुकमित्यादौशृंगेशश
संवंधाभावदशायांशाब्दवोधस्यव्युत्पत्त्यापादयितुमशक्यत्वात् इतिनैयायिकोक्तमपास्तंलटो

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६

वर्तमानत्वंप्रारब्धापरिसमाप्तिरूपमर्थः ननुवर्तनामेपिपाके आयक्तनिर्ध्वंसस्समादायापातीदित्य
स्यभाविक्तनिमादापपन्नत्वेनोक्तस्यचापत्तिरिति चेन्नचरमक्तनिर्ध्वंसस्यभूतप्रस्यभूतप्रत्ययेनआयक्त।
निर्ध्वंशस्यभविष्यत्वरूपेनाभिधानात् यजतिस्मयुधिष्ठिरः एवंस्मपिताब्रवीति इत्यादौस्मसमभि।
व्याहृतलटःपरोक्षभूतानद्यतनत्वमर्थः एवमन्यत्रयथायथमूह्यम् यत्तुभावनायाश्चविशेष्यत्वेना
न्वययोग्यकर्मत्वाद्यनवरुद्धइतरविशेषणाइतिवाप्रथमांतशब्दोपस्थाप्यस्यैवाकांक्षितत्वात् त
त्रकर्मत्वादौत्वादिविशेषणांतःचंद्रइवमुखमस्तीत्यादौचंद्रेभावनाविशेष्यत्ववारणायेत्युक्तनैयायि
कनव्याःतन्नचैत्रेणघटएवदृश्यते इत्यत्रैवकारार्थेऽस्मिन्नपिघटस्यविशेषणानपायितरविशेष।
णत्वेनतात्पर्यज्ञानाभावस्यासत्वात् घटस्यभावनाविशेष्यत्वंनस्यात् नचनिपातातिरिक्तेतिवाच्य ५९
म् नारद इत्यबोधिस इत्यादौनारदादौनामपिक्रियाविशेष्यत्वापत्तेःभाष्यकारादिर्यवैकारैक्रियावि
शेष्यकबोधस्यस्वीकृतत्वेनग्रंथकाराणांप्रथमान्तविशेष्यकबोधे आकांक्षाविरहाच्च ॥इतिश्रीम
न्मौलितिलकायमानगोवर्धनभट्टाचार्यात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचित आख्यात
विवेकः समाप्तिमगमत्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

CC-0 Dharmartha Trust J&K. An eGangotri Initiative